www.ncerthelp.com

# संस्कृतम्
## कक्षा–नवमी

**अवधिः – होरात्रयम्** **पूर्णांकः 80**

| | | | |
|---|---|---|---|
| खण्डः (क) | – | अपठित–अवबोधनम् | = 12 अंकः |
| खण्डः (ख) | – | रचनात्मक – कार्यम् | = 12 अंकः |
| खण्डः (ग) | – | अनुप्रयुक्त–व्याकरणम् | = 28 अंकः |
| खण्डः (घ) | – | पठित–अवबोधनम् | = 28 अंकः |

### खण्डः (क) अपठित–अवबोधनम् = 12 अंकः

**प्रश्न**1. अधोलिखितं अनुच्छेदद्वयं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत–

**(क) प्रथमः अनुच्छेदः**

अधुना पर्यावरणस्य समस्या न केवलं अस्माकं अपितु समस्तविश्वस्य ज्वलन्त समस्या वर्तते। यज्जलं यश्च वायुः, अद्य उपलभ्यते, तत्सर्वं मलिनं दूषितश्च दृश्यते। उद्योगानां प्रदूषित जलं नालानां माध्यमेन वहति गंगासदृशी पावनी नदीमपि अद्य मलिनतां गता। असमाकं पूर्वजाः पर्यावरणस्य शुद्धतायै उपवनानां उद्यानानाम् च आरोपणम् कुर्वन्ति स्म। विगतकाले वनानां छेदनेन वृक्षाणाम् अभावो अभवत्। तेषां अभावे अपेक्षिताः वृष्टिः न भवति। अनावृष्टिः अस्माकं कृषिकार्यम् बाधते। पर्यावरणस्य रक्षायै वयं सर्वथा सचेष्टाः भवेम।

1. अधुना पर्यावरणस्य समस्या कुत्र वर्तते? (1)
   क. भारतदेशे ख. अमेरिका देशे ग. समस्त विश्वे

2. पूर्णवाक्येन उत्तरत– (2)
   अस्माकं पूर्वजः पर्यावरणस्य शुद्धतायै किम् कुर्वन्ति स्म ?

3. भाषिक कार्यम् (1/2)
   क. अस्मिन् अनुच्छेदे 'भवेम' क्रियापदस्य कर्तृपदं किम्?
   अ. उद्योगपतिः ब. वयं
   स. पूर्वजाः द. वृक्षाणि

4. 'पावनी नदी' पदयोः विशेषणपदं किम्? (1/2)

**(ख) द्वितीयः अनुच्छेदः**

यदा अर्जुनः महाभारतस्य युद्धे आत्मनः सम्मुखे स्वभातृन् गुरूजनान् सम्बन्धिनश्च दृष्टवा खिन्नः निराशश्चाभवत्। सः दुःखितमनसा स्वास्त्र–शस्त्राणि व्यक्त्वा युद्धात् पलायनायम् तत्परोऽभवत्। तदा ते युद्ध–विमुखं दृष्ट्वा श्रीकृष्णेन तस्मै गीतायाः उपदेशं दत्तवान्। श्री कृष्णस्य अर्नुनाय दत्तं उपदेशं गीतायां महर्षिः वेदव्यासेन निबद्वम्। गीतायां अष्टादश अध्यायाः सन्ति। गीता मनुष्यमात्रं निष्कामकर्मणः संदेशं ददाति। गीतायां उक्तम् – 'कर्मण्ये वाधिकारास्ते मा फलेषु कदाचनं ' निष्काम कर्मव्यवहारः एव अस्माकं जीवनोद्वारस्य उपायः। गीता अखिल विश्वस्य हितार्थं एकम् अद्वितीयग्रन्थमस्ति।

**प्रश्नाः–**

1. एकपदेन उत्तरत– (2)
   1. कः महाभारतस्य युद्धे खिन्नः अभवत्?
   2. अर्जुनः कानि व्यक्त्वा युद्धात् पलायनाय तत्पर्रोऽभवत् ?

2. पूर्णवाक्येन उत्तरत– (2)
   गीतायां महर्षिः वेदव्यासेन किम् निबद्वम् कृतम्।

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...

www.ncerthelp.com

3. ' तत्परोऽभवत् ' इति क्रियापदस्य किं कर्तृपदम् ? (1)
   अ. श्रीकृष्णः ब. कर्णः
   स. अर्जुनः द. महर्षिः वेदव्यासः

4. ' युद्ध विमुखं ' दृष्ट्वा श्रीकृष्णेन तस्मै गीतायाः उपदेशं दत्तवान्' इत्यत्र 'तस्मै' इति सर्वनाम पदं कस्मै प्रयुक्तम ? (1)
   अ. छात्राय ब. मानवाय
   स. अर्जुनाय द. भीमाय

5. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (2)

**खण्डः (ख) रचनात्मकं–कार्यम् = 12 अंकः**

**प्रश्न** 2. पत्र–लेखनम् (04)

भवतां नाम आशीषः। भवतः मित्रं आनन्दः दिल्लीनगरे वसति। तं परीक्षायां सफलतायै वर्धापन–पत्रं(मन्जूषातः पदानि सहायतया) लिखत–

लक्ष्मणपुरनगरतः
दिनांकः 12.01.10

प्रिय मित्र!
(i)………. नमस्ते।
अत्र कुशलं तत्रास्तु।
तव सफलताम् ज्ञात्वा मनसि (ii)………………………. प्रसन्ना जाता। मम एषा प्रसन्नता अधिकतरा जाता यदातव (iii) ………………….. योग्यता–सूचौ(iv)……………………. । त्वया सप्त–शतानि अङ्काः (v) ……………………. । त्वया परिवारस्य विद्यालयस्य च नाम उज्जवलीकृतम्। अस्याम् (vi) ……………………… अहम् तुभ्यं हार्दिकं वर्धापनं यच्छामि (vii) ……………… भविष्याय च कामये। मातृपितृचरणेषु प्रणामाः।तव प्रियं मित्रं(viii) ………….. …………..

मन्जूषाः

| |
|---|
| उज्ज्वल, आशीषः, सस्नेहं, महती, अपश्यम्, नाम, प्राप्ताः, सफलतायाम् |

प्रश्न (03) अनुच्छेदलेखनम्–
'अस्माकं मातृभूमिः' इति विषये मन्जूषागत–पद सहायतया संस्कृतेन चत्वारि वाक्यानि लिखत– (08)

मन्जूषाः


| |
|---|
| मिलित्वा, आर्यावर्तः, धर्मनिरपेक्षः, उन्नतिपथम्, भारतीयाः, प्राचीनम्, देशः, भारतम्, नाम । |

अथवा

अधोलिखितं चित्रं दृष्ट्वा मन्जूषायाम् प्रदत्तशब्दानाम् सहायतया चत्वारि वाक्यानि लिखत–

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...

www.ncerthelp.com



मन्जूषाः

| |
|---|
| पत्राणि, आम्रस्य, शुकाः, स्थिताः, त्रयःबालकाः, वृक्षे, पच्च, खादतः, शुकौ, वायुः, आम्रफलं, रटति, शुकः, एकः, पतन्ति, वृक्षात्, खेलन्ति, वहति |

**खण्डः (ग) अनुप्रयुक्त–व्याकरणम् = 28 अंकः**

**प्रश्न** 4.

(i) रेखांकित पदे 'भगवत्' शब्दस्य का विभक्तिः? (01)

**भगवतः** कृपया सर्वे जीवन्ति।

क. सप्तमी ख. प्रथमा

ग. षष्ठी घ. द्वितीया

(ii) अधोलिखित वाक्ये रिक्तस्थाने किं पदं भविष्यति? (01)

....................................... कुत्र गच्छति? (भवत्)

क. भवन्तः ख. भवान्

ग. भवन्तौ

(iii) कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण रिक्तस्थानानि पूरयत– (02)

क. स्वदेश पूज्यते..................। (राजानौ, राजा, राजानः)

ख. ..................सर्वत्र सम्मानः भवति। (विद्वांसः, विदुषां, विद्वांसौ)

**प्रश्न** 5.

(i) रेखांकित पदे का विभक्तिः, किं च वचनम्? (01)

पृथिव्यां त्रीणि रत्नानि।

क. प्रथमा, एकवचनम् ख. प्रथमा, बहुवचनम्

ग. द्वितीया, एकवचनम् घ. तृतीया, एकवचनम्

(ii) अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति? (01)

वृक्षात् ............................ फले पततः । (द्वि)

क. द्वौ ख. द्वे

ग. द्वयोः घ. द्वाभ्याम्

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...

www.ncerthelp.com

(iii) कोष्ठके प्रदत्तशब्दे उचित विभक्तिं प्रयुज्य वाक्यपूर्तिः क्रियताम् (02)
क. अस्मिन् वृक्षे ....................................... चटकाः सन्ति। (चतुर)
ख. ............................................................... चक्राणि भवन्ति। (अष्ट)

**प्रश्न** 6. अधोलिखित वाक्येषु कोष्ठके प्रदत्तधातूनां लोट्लकारे क्रियापदानां किं समुचितं रूपं भविष्यति?(03)
(i) बहिः मा ....................................... । (गच्छतु , गच्छ, गच्छानि)
(ii) आवाम् कुत्र ...............................? (गच्छताम् , गच्छतम्, गच्छाव)
(iii) वयं ....................................... । (पश्यानि, पश्याव, पश्याम)

**प्रश्न** 7. अधोलिखित वाक्येषु विधिलिंग क्रियापदानि योजयत– (03)
(i) वयं स्वदेशं ....................................... । (रक्ष)
(ii) यूयं गुरूणां दर्शनं............................ । (कृ)
(iii) त्वम् देवालयं.................................. । (गम्)

**प्रश्न** 8. अधोलिखित वाक्येषु रिक्तस्थानि समुचितपदैः पूरयत – (03)
(i) अलं ....................................... । (कोलाहल)
अ. कोलाहलं ब. कोलाहलेन
स. कोलाहलाय द. कोलाहलात्

(ii) छात्राः .............................प्रति गच्छन्ति। (विद्यालय)
अ. विद्यालये ब. विद्यालयस्य
स. विद्यालयं द. विद्यालयात्

(iii) गुरूः ....................................विश्वसिति.। (शिष्य)
अ. शिष्यम् ब. शिष्याय
स. शिष्ये द. शिष्यस्य

**प्रश्न** 9. उचित शब्दं चित्वा रिक्तस्थानानि पूरयत – (05)
(i) ..................................सह दिनेशः आपणं गच्छति। (जनकाय/जनकेन)
(ii) धिक् ..................... । (कापुरूषं/ कापुरूषाय)
(iii) ..................... नमः । (गणेशं/ गणेशाय)
(iv) सः ..................... पतति। (अश्वात्/ अश्वे)
(v) ..................... परितः पुष्पाणि सन्ति। (विद्यालयं/ विद्यालयस्य)

**प्रश्न** 10.
(1) धातु + क्त / क्तवतु प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत– (03)
(क) त्वया मधुरं गीतं ............................... ।
(i) श्रुतः (ii) श्रुतम्
(iii) श्रुत्वा (iv) श्रोतुम्

(ख) रामः वनं ............................... ।
(i) गतवान् (ii) गच्छन्
(iii) गतवन्तः (iv) गतवत्

(ग) सीता जलं ............................... ।
(i) पीतवती (ii) पीतवान्
(iii) पीतवन्तः (iv) पीतवत्

(2) निर्दिष्ट–धातु–प्रत्यययोगेन रूपेण वाक्यपूर्ति कुरूत– 1x3= (03)
(i) हाटं..................... (गम् + शतृ) जनः क्रुध्यति।
(ii) ............................ (नृत् + शतृ) छात्रा गीतं अपि गायति।
(iii) व्याधः मृगं.......... (दृश् + क्तवतु)।

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...

www.ncerthelp.com

**खण्डः (घ) पठित– अवबोधनम् = 28 अंकः**

**प्रश्न** 11. गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि लिखत–

**अ. गद्यांशं :**

एकदा असौ मुनिः क्वापि नगरे एकं ब्राहणगृहम् एत्य तद्गृहिणी भिक्षामयाचत। सा पतिव्रता गृहिणी तमवदत्–'प्रतीक्षस्व क्षणं यावद् भर्तुः परिचर्यां समापये ' इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्ट्वान्। सा विहस्य अभाषत– ''मुने! न अहं बलाकेति''। तत् आकर्ण्य विस्मितः मुनिः ''एतत् कथमिव ज्ञातमनया'' इति चिन्तयन् तत्र उपाविशत्।

(i) एकपदेन उत्तरत– (01)
मुनिः कां भिक्षां अयाचत?

(ii) पूर्ण वाक्येन उत्तरत– (02)
गृहिणी मुनिं किमवदत्?

(iii) यथानिर्देशम् उत्तरत– (01)
'विहस्य' इति पदस्य अर्थः अस्ति–
क. उपहस्य ख. हसित्वा ग. अनुहस्य

**आ. पद्यांशं :**

'' शोषितो नात्र कश्चित् भवेत् केनचित् ,
व्याधिना पीडितो नो भवेत् कश्चन
नात्र कोऽपि व्रजेद् दीनतां हीनता
मोदतां राजतां पावनं भारतम् ।। ''

(i) कोऽपि जनः केन पीडितः न भवेत्। (1)
अ. व्याधिना ब. केनचित्
स. दीनताम् द. हीनताम्

(ii) पूर्णवाक्येन उत्तरत– (2)
' कोऽपि जनः दीनः हीनः न भवेत्' इति कस्याः पंक्तेः अर्थः?

(iii) (1)
' शोषितो नात्र कश्चित् भवेत् केनचित्' इति पंक्त्याः शुद्धम् अर्थं चित्वा लिखत–
– कश्चित् अपि जनः भारते केन शोषितः भवेत् ?
– कः जनः भारते केनचित् शोषितो न भवेत्?
– कोऽपि जनः भारते के नावि जनेन उत्पीडितः न भवेत्।

**इ. नाट्यांश :**

प्रथमः भिल्लः – हा धिक। कीदृशः समयः आगतः । देशभक्तः प्रतापः अपि स्वदेशं परिव्यज्य अन्यत्र प्रस्थितः।
द्वितीयः भिल्लः – न जानेऽस्य मेवाउदेशस्य भागयं किं लिखितम्? हा निष्ठुर दैव! देशभक्ते तु दयस्व।
तृतीय भिल्लः – वराकोऽयं जीवनसामग्री युद्ध सामग्रयोः अभावेन खिद्यते। परमेश्वर! दयस्व! भारतभमेः दुर्दशां स्वचक्षुषां कथं द्रक्ष्यामः? (सर्वे भिल्लाः विलपन्ति)

(i) एकपदेन उत्तरत– (1)
के विलयन्ति ?
क. भिल्लाः ख. सैनिकाः ग. भटाः

(ii) पूर्णवाक्येन उत्तरत– (1)
प्रतापः कयोः अभावेन खिद्यते ?

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...

www.ncerthelp.com

(iii) निर्देशानुसारम् उत्तरत– (2)
1. 'देशभक्तः प्रतापः' अत्र किं विशेषणपदम् ?
2. 'सर्वे भिल्लाः विलपयन्ति' अस्मिन् वाक्ये किं सर्वनामपदम् ?
क. सर्वे ख. भिल्लाः ग. विलपन्ति

**प्रश्न** 12. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि क्रमेण पुनः लिखत– 1/2x8= (04)
क. तन्तुवायः तन्तुवयेन जीविकां अर्जयति स्म।
ख. तन्तुवायः महाकवितुल्यः न आसीत्।
ग. एकदा लक्ष्मीधरः भोजनाराजस्य सभां गच्छति।
घ. भोजराजः लक्ष्मीघरस्य वाक्चातुर्येण प्रसन्नः भवति।
ङ. नगरपालः तन्तुवायं राजसभां नयति।
च राजा तन्तुवायस्य पदयोजनां प्रशंसति।
छ. राजा भोजः मन्त्रिणं लक्ष्मीघरस्य आवास व्यवस्थायै आदिशति।
ज. वस्तुतः तन्तुवायः अपि कविः आसीत्।

**प्रश्न** 13. श्लोकयोः अन्वयं पूरयत– (02)
(1) " आम्र! यद्यपि गता दिवसास्ते पुष्पसौरभफल प्रचुरा ये।
हन्त! सम्प्रति तथापि जनानां छाययैव दलयस्य तितापम्।।"

अन्वयः आम्र! (i) ............... ते दिवसाः गताः ये पुष्पसौरभफल–प्रचुराः (भवन्तिस्म), हन्त! (ii) ............... सम्प्रति छायया (iii) ............... जनानाम् (iv) ............... दलयसि।

(2) " त्रिनेत्रोऽपि शिवो नास्मि, घटो नास्मि जलान्वितः। (02)
कूर्चश्मश्रुयुतो नित्यं, नरो नास्मि ब्रवीतु माम्।।"

अन्वयः त्रिनेत्रः अपि शिवः न (i) ............... ............(ii) व............... घटः न अस्मिं। (iii) ............... कूर्चश्मश्रुयुतो (iv) ............... नरः न अस्मि, नाम ब्रवीतु।

**प्रश्न** 14. अधोलिखित–कथनेषु रेखांकितपदानि आधृत्य प्रश्न निर्माणं कुरूत– (04)
(i) मुनिः **<u>पतिव्रतां</u>** भिक्षां अयाचत।
अ. कस्या आ. काम् इ. कस्मात्
(ii) मातुः चिन्तां ज्ञात्वा **<u>अष्टावक्रः</u>** राजसभां गन्तुम् उद्यतः आसीत्।
अ. कः आ. कौ इ. के
(iii) भारतीय विज्ञानं **<u>सर्वहिताय</u>** आस्ति।
अ. कस्मै आ. कम् इ. कैः
(iv) मे भारतं भूतले विभाति।
अ. कस्मात् आ. कुत्र इ. कस्मै

**प्रश्न** 15. अधोलिखितेषु शुद्धम् अर्थम् चित्वा लिखत– (04)
(i) धर्मः (घर्मः / आतपः)
(ii) दारूभिः (काष्ठैः / मदिराभिः)
(iii) महीरूहाः (नृपाः / वृक्षाः)
(iv) समन्तात् (सर्वतः / उभयतः)

Visit www.ncerthelp.com for Ncert Solutions in Text and Video , CBSE Sample papers, Exam tips, NCERT BOOKS, Motivational Videos, Notes for All Classes and Many More...